मन्थशैलः, पुं, ( मन्थाय समुद्रमन्थनाय कल्पितः शैलः ।) मन्दरपर्व्वतः । इति जटाधरः ॥

मन्था, स्त्री, ( मथ्यते इति । मन्थ + घञ् । ततः स्त्रियां टाप् । ) मेथिका । इति राजनिर्घण्टः ॥ ( यथा, भावप्रकाशे पूर्व्वखण्डे ।
"वल्लरी चन्द्रिका मन्था मिश्रपुष्पा च कैरवी ॥")

मन्थाः, [ थिन् ] पुं, ( मन्थ + "मन्थः ।" उणा० ४ । ११ । इति इनिः । स च कित् । ) मन्थानदण्डः । इत्यमरः । २ । ९ । ७४ ॥ ( यथा, किरातार्ज्जुनीये । ४ । १६ ।
"मुहुः प्रणुन्नेषु मथां विवर्त्तनै-
र्नदत्सु कुम्भेषु मृदङ्गमन्थरम् ॥" )

मन्थानः, पुं, (मथ्यते अनेनेति । मन्थ + बाहुलकात् आनच् । ) मन्थदण्डकः । इत्यमरः । २ । ९ । ७४ ॥ ( यथा, देवीभागवते । १ । १० । २५ ।
"मन्थानारणिसंयोगान्मन्थनाच्च समुद्भवः ।
पावकस्य यथा तद्वत् कथं मे स्यात् सुतोद्भवः ॥")
आरग्वधः ॥ इति राजनिर्घण्टः ॥ ( समुद्रमन्थनदण्डकत्वादस्य तथात्वम् । मन्दरपर्व्वतः । यथा, रामायणे । १ । ४५ । २७ ।
"प्रविवेशाथ पातालं मन्थानः पर्व्वतोत्तमः ॥"
महादेवः । यथा, महाभारते । १३ । १७ । १२८ ।
"मन्थानो बहुलो वायुः सकलः सर्व्वलोचनः ॥")

मन्थानकः, पुं, ( मन्थान इवेति । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) तृणभेदः । तत्पर्य्यायः । हरितः २ हृद्गन्धः ३ तृणाङ्घ्रिपः ४ । अस्य गुणाः । स्निग्धत्वम् । दोग्ध्रीणां प्रियत्वम् । मधुरत्वम् । बहुवीर्य्यदत्वञ्च । इति राजनिर्घण्टः ॥

मन्थिनी, स्त्री, ( मन्थो मन्थनमस्त्यस्याम् । मन्थ + इनिः । ङीप् ।) दधिमन्थनपात्रम् । तत्पर्य्यायः । गर्गरी २ कलशी ३ । इति हेमचन्द्रः । ४ । ८८ ॥

मन्थोदधिः, पुं, ( मथ्यतेऽसौ । मन्थ + कर्म्मणि घञ् । मन्थश्चासौ उदधिश्चेति । मन्थाय उदधिरिति वा ।) क्षीरसमुद्रः । इति केचित् ॥

मन्दः, पुं, ( मन्दते इति । मदि + अच् । ) शनिः । ( यथा, ज्योतिषे ।
"शुक्रेन्दुबुधजीवानां वाराः सर्व्वत्र शोभनाः ।
भानुभूसुतमन्दानां शुभकर्म्मसु केष्वपि ॥" )
हस्तिजातिविशेषः । इति मेदिनी । दे, १३ ॥ यमः । इति त्रिकाण्डशेषः ॥ ( यथा, कथासरित्सागरे । १२ । १५५ ।
"तत्र मन्दमिवालोक्य साभिप्रायः स मां नृपः ।
पप्रच्छ रे किमीदृक् त्वं सञ्जातः कथ्यतामिति ॥")
प्रलयः । इत्यजयः ॥ (जठरानलविशेषः । यथा, हारीते चिकित्सितस्थाने ६ अध्याये ।
"तीक्ष्णः पित्ताधिकत्वेन जायते जठराग्निकः ।
वातश्लेष्माधिकत्वेन जायते मन्दसंज्ञकः ॥")

मन्दः, त्रि, ( मदि + अच् । ) अतीक्ष्णः । मूर्खः । ( यथा, रघुवंशे । १ । ३ ।
"मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम् ॥")
स्वैरः । अभाग्यः । रोगी । अल्पः । इति मेदिनी । दे, १३ ॥ (यथा, मेघदूते । १ । ४ ।
"मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वाम् ॥"
अलसः । यथा, श्रीमद्भागवते । १ । १ । १० ।
"प्रायेणाल्पायुषः सभ्य ! कलावस्मिन् युगे जनाः ।
मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः ॥"
"मन्दाः अलसाः ।" इति तट्टीकायां श्रीधरस्वामी ॥ )
मदरतः । खलः । इति हेमचन्द्रः । ३ । ४८ ॥

मन्दगः, त्रि, ( मन्दं अल्पं गच्छतीति । गम् + डः । ) मृदुगामी । यथा,—
"मन्दगाश्च शनिशानिहषहंसगजस्त्रियः ॥"
इति कविकल्पलता ॥
( पुं. शाकद्वीपस्थजनपदभेदः । यथा, महाभारते । ६ । ११ । ३३ ।
"तत्र पुण्या जनपदाश्चत्वारो लोकसम्मताः ।
मगाश्च मशकाश्चैव मानसा मन्दगास्तथा ॥")

मन्दगामी, [ न् ] त्रि, ( मन्दं गच्छतीति । गम् + णिनिः । ) मृदुगमनशीलः । तत्पर्य्यायः । मन्थरः २ । इत्यमरः । ३ । १ । ७२ ॥ स्वैरगामी ३ मन्दः ४ । इति शब्दरत्नावली ॥

मन्दजननी, स्त्री, ( मन्दस्य शनेर्ज्जननी माता । ) शनैश्चरमाता । सूर्य्यपत्नी । इति त्रिकाण्डशेषः ॥

मन्दटः, पुं, ( मन्दमटतीति । अट् + अच् । शकन्ध्वादित्वात् साधुः । ) पारिभद्रवृक्षः । इति शब्दरत्नावली ॥

मन्दता, स्त्री, ( मन्दस्य भावः । मन्द + भावार्थे तल् । स्त्रियां टाप् । ) आलस्यम् । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते शारीरस्थाने ।
"दुर्म्मेधस्त्वं मन्दता च स्वप्ने मैथुननित्यता ।
निराकरिष्णुता चैव विज्ञेयाः पाशवा गुणाः ॥")
मन्दत्वम् । ( यथा, चन्द्रालोके । १ । १ ।
"उच्चैरस्यति मन्दतामरसतामिति ॥"
क्षीणता । यथा, साहित्यदर्पणे । ३ । ६८ ।
"मध्यस्य प्रथिमानमेति जघनं वक्षोजयोर्मन्दता
दूरं यात्युदरञ्च रोमलतिका नेत्रार्ज्जवं धावति ॥" )

मन्दनं, क्ली, ( मन्दते स्तौति अनेन । मन्द् + "कृपृवृजिमन्दिनिधाञः क्युः । उणा० २ । ८१ । इति करणे क्युः । ) स्तोत्रम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

मन्दरः, पुं, ( मन्द् + बाहुलकात् अरः । ) मन्थशैलः । (यथा, महाभारते । १ । १८ । १३ ।
"मन्थानं मन्दरं कृत्वा तथा नेत्रञ्च वासुकिम् ॥")
मन्दारपादपः । इति मेदिनी । रे, १६६ ॥ स्वर्गः । हारभेदः । इति हेमचन्द्रः । ४ । ६६ ॥ मुकुरः । इति शब्दरत्नावली ॥ ( कुशद्वीपस्थपर्व्वतविशेषः । यथा, मात्स्ये । १२२ । ६१ ।
"मन्दरः सैव विज्ञेयः सर्व्वधातुमयः शुभः ।
मन्द इत्येष यो धातुरपामर्थे प्रकाशकः ॥
अपां विदारणात् चैव मन्दरः स निगद्यते ॥")

मन्दरः, त्रि, ( मन्द् + अरः ।) बहलः । मन्दः । इति मेदिनी । रे, १६६ ॥

मन्दसानः, पुं, ( मन्दते स्तुत्यादिकं प्राप्नोतीति । मन्द + "ऋञ्जिवृधिमन्दिसहिभ्यः कित् ।" उणा० २ । ८७ । इति असानच् । ) अग्निः । प्राणः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ निद्रा । इत्युणादिकोषः ॥ ( त्रि, मोदमानः । यथा, ऋग्वेदे । १ । १०० । १४ ।
"मन्दसानो मरुत्वान् ।"
"मन्दसानो मोदमानः सन् ॥" इति तद्भाष्ये सायनः ॥ )

मन्दसानुः, पुं, ( मन्दं मन्दतां सनोति ददातीति । मन्द + सन् + बाहुलकात् उण् । ) स्वप्नः । जीवः । इति संक्षिप्तसारोणादिवृत्तिः ॥

मन्दा, स्त्री, ( मन्द + स्त्रियां टाप् । ) संक्रान्तिविशेषः । सा उत्तरफल्गुन्युत्तराषाढोत्तरभाद्रपदारोहिणीनक्षत्रेषु रविसंक्रान्तिश्चेत्तदा भवति । तस्याः सन्निहितदण्डत्रयस्य पुण्यतमत्वम् । यथा,—
"मन्दा मन्दाकिनी ध्वांक्षी घोरा चैव महोदरी ।
राक्षसी मिश्रिता प्रोक्ता संक्रान्तिः सप्तधा नृप ! ॥
मन्दा ध्रुवेषु विज्ञेया मृदौ मन्दाकिनी तथा ।
क्षिप्रे ध्वांक्षीं विजानीयादुग्रे घोरा प्रकीर्त्तिता ॥
चरैर्म्महोदरी ज्ञेया क्रूरैर्ऋक्षैस्तु राक्षसी ।
मिश्रिता चैव विज्ञेया मिश्रैर्ऋक्षैस्तु संक्रमः ॥"
इत्येतेषांदशस्त्वेव संक्रान्तिषु ध्रुवादिनक्षत्रयोगात् मन्दादिरूपतया सप्तधा भिन्नासु त्रिचतुःपञ्चसप्ताष्टनवद्वादश एव च । क्रमेण घटिका ह्येतास्तत्र पुण्यं पारमार्थिकमिति देवीपुराण एव त्रिचतुरादिघटिकानां पुण्यत्वमुक्तम् । इति तिथ्यादितत्त्वम् ॥

मन्दाकं, क्ली, ( मन्दते स्तूयते इति । मन्द् + बाहुलकात् आकः । ) स्तवनम् । इत्युणादिकोषः ॥ (स्रोतः । इत्युज्ज्वलदत्तः । ४ । १३ ॥)

मन्दाकिनी, स्त्री, (मन्दाकानि स्रोतांसि सन्त्यस्याः इति । मन्दाक + इनिः । यद्वा, "मन्दमकितुं शीलमस्याः । णिनिः । यद्वा, मन्दनाम्नः सरसः अकति गच्छतीति । नयनानन्दः ।" इत्यमरटीकायां रघुनाथचक्रवर्त्ती । ) स्वर्गगङ्गा । तत्पर्य्यायः । वियद्गङ्गा २ स्वर्नदी ३ सुरदीर्घिका ४ । इत्यमरः । १ । १ । ५२ ॥ स्वर्गङ्गा ५ देवभूतिः ६ स्वर्णपद्मा ७ सुरेश्वरी ८ । इति शब्दरत्नावली ॥ (यथा, नैषधचरिते । ६ । ८२ ।
"मन्दाकिनीनन्दनयोर्विहारे
देवे भवद्देवरि माधवे वा ॥")
तस्या विवरणं यथा,—